(४) पूजाद्रव्यादि संप्रोक्ष्य मूलास्त्राभ्यां विधानतः।
दर्शयेद्धेनुमुद्रां च द्रव्यशुद्धिरियं मता॥
(५) पीठे देवं प्रतिष्ठाप्य सकलीकृत्य मन्त्रवित्।
मूलमन्त्रेण दीप्तात्मा अभिभव्योदकेन च।
त्रिवारं प्रोक्ष्येद्विद्वान् देवशुद्धिरितीरिता॥

(1)

अथात्मशुद्धिक्रमः॥

Details regarding the five purifications are given in *Arcanā-prakāśa* as follows:

१. अथासनशुद्धिः॥

आसनाधो जलादिना षट्कोणं त्रिकोंण वा
विलिख्य, तत्र
ओं कूर्मासनाय नमः
ओं ह्रीं आधारशक्तिकमलासनाय नमः
ओं पृथिव्यै नमः

इति गन्धाक्षतपुष्पैः सम्पूज्य तत्र द्विहस्तायत विस्तायत विस्तारषडङ्गुलोत्सेध बिल्वाश्वत्थ पलाशाद्यैः कल्पितं कूर्मकृतिपीठं विन्यस्य, तदुपरि कुशासनं, तदुपरि मृगाजिनं, तदुपरि कम्बलाद्यासनमास्तीर्य, स्थापितानां त्रयाणामासनानामुपर्युपरि क्रमेण–

ओं अनन्तासनाय नमः
ओं विमलासनाय नमः
ओं पद्मासनाय नमः

इति मन्त्रत्रयेण त्रीन् दर्भान् प्रत्येकं प्रत्येकं विद्ध्यात्।
एवं आसनं सस्थाप्य रुचिरासने उपविश्य

ओं पृथ्वीति मन्त्रस्य। मेरुपृष्ठ ऋषिः। सुतलं छन्दः। आदिकूर्मो देवता। आसनसिध्यर्थे जपे विनियोगः।

ओं पृत्वि त्वया धृता लोका देवि त्वं विष्णुना
धृता।
त्वं च धाराय मां देवि पवित्रं कुरु चासनम्॥
स्योनापृथिवीति च जप्त्वा

अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा।
यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः॥"
इति आसनं सम्प्रोक्ष्य,
"आ ते रुद्रशिवातनूः"
इति शिखां बध्वां अप उपस्पृश्य तत्वाचमनं कुर्यात्॥
॥ इति आत्मशुद्धिक्रमः॥

२. अथाचमनक्रमः॥

गोकर्णाकृतिनामाषमग्नजलं गृहीत्वा

ओं हां आत्मतत्वं शोधयामि नमः ब्रह्मणे स्वाहा।
ओं हीं विद्यातत्वं शोधयामि नमः विष्णवे स्वाहा।
ओं हं शिवतत्वं शोधयामि नमः रुद्राय स्वाहा।

इति त्रिरपः पीत्वा

ओं हृः सर्वतत्वं शोधयामि ईश्वराय नमः

इति पाणिं प्रक्षाल्य ओष्टावङ्गुष्टमूलेन ओं हः अस्त्राय फडिति द्विः परिमृज्य हस्ततलेन मुखं सकृत्परिमृज्य अङ्गुष्ठानामिकाभ्यां चक्षुषी, अङ्गुष्ठ तर्जनीभ्यांतु नासिके, अङ्गुष्ठकनिष्ठिकाभ्यां श्रोत्रे हृदयं पादौ मूर्धानं च संस्पृशेत्॥ एवं द्विराचम्य

आदौ कल्पप्रवक्तृभ्यः श्रौतस्मार्तादि कर्मणाम्।
बोधायन तपस्विभ्यः वंशर्षिभ्यो नमो नमः॥
आदौ शिवगुरुस्कन्दश्चागस्त्यश्च ततः परम्।
दूर्वासाश्चोपमन्युश्च त्वघोराचार्य एव च॥

त्रिलोचनशिवश्चेति सम्प्रदायक्रमाद्गुरून्।
शिवोष्टमूर्तयः पश्चात्सर्वमूर्तिविशेषकान्।
नत्वा सम्प्रार्थ्य कुर्वेऽहं शिवपूजां विधानतः॥

इति प्रार्थनादि कृत्वा दर्भान्धारयमाणः प्राणायामं कुर्यात्॥

॥ इत्याचमनक्रमः॥

३. अथ प्रणायामक्रमः॥

सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह।
त्रिःपठेदायप्राणः प्राणायामः स उच्यते॥

ओं प्रणवस्य परब्रह्मा ऋषिः। दैवी गायत्री छन्दः।

परमात्मा देवता। प्राणायामे विनियोगः।

रेचक पूरक कुम्भकक्रमेण इहा पिङ्गला सुषुम्नानाडित्रये प्राणापानयोः समानयोगं विधिना परिकल्प्य प्राणायामत्रयं कुर्यात्।

इति प्राणायामक्रमः॥

४. अथ शिवहस्तभावना॥

करौ गन्धादिलेपितौ कृत्वा वामकरतल तत्पृष्टमणिबन्धादारभ्य दक्षिणपाणिना ओं हः अस्त्राय फडिति द्विवारं परिमृज्य तेनैव मन्त्रेण दक्षिणकरतलतत्पृष्ठमणिबन्धादारभ्य वामपाणिना त्रिवारं परिमृज्य करावामणिबन्धमस्त्रतेजसा व्याप्तौ सञ्चिन्त्य मूलेन गन्धपुष्पाक्षतान् वामाङ्गुष्ठेन दक्षिणकरतले विन्यस्य निरीक्षणादिभिः संस्कृत्य धर्माद्य आसनमभ्यर्च्य मूलेन ब्रह्माङ्ग विन्यस्य तेनामृतेन ओं हौं शक्तये वौषडिति कवचद्वयमाप्लाव्य अङ्गुष्ठद्वय अमृतरूपं शक्तिमण्डलं ध्यात्वा सम्पुटीकृत्य

योजिताङ्गुष्ठद्वय कर्णिकाकारकरसम्पुटकमले ओं हां शिवासनाय नमः इति विन्यस्य तन्मध्ये ओं हां हं हां शिवमूर्तये नमः इति तेजोमयी स्थिरविद्युन्निभां सितवर्णां शिवस्य सूक्ष्ममूर्तिं ज्योतीरूपां शिवमन्त्रेण शिरसि विन्यस्य हस्तद्वयं प्रासादेन दिव्यदृष्ट्याऽवलोक्य शिवकराविति भावयित्वा सकलीकरणं कुर्यात्॥

इति शिवहस्तभावना॥

५. अथ सकलीकरणम्॥

ओं हों ईशानमूर्ध्ने नमः इत्यङ्गुष्ठ्योः तर्जनीभ्यां।
तर्जन्यादिकनिष्ठान्तं अङ्गुष्ठभ्यां- ओं हें
तत्पुरुषवक्त्राय नमः।
ओं हूं अघोरहृदायाय नमः।
ओं हीं वामदेवगुह्याय नमः।
ओं हां सद्योजातपादाभ्यां नमः।

॥ इति विन्यस्य॥

करतलयोः अङ्गुष्ठतर्जनीभ्यां- ओं हां हौं विद्यादेहाय नमः इत्यष्टत्रिंशत्कलामयं सदाशिवात्मकं ठु झ स्थूलं विद्यादेहं विन्यस्य

ओं हां नेत्रेभ्यो नमः इति नेत्रत्रयं तर्जनीमध्यमानामिकाभिः करतलयोः विन्यस्य

हां हौं शिवाय नमः इत्यङ्गुष्टानामिकाभ्यां सदाशिवदेहव्यापकं शिवमावाहयेत्॥

कनिष्ठाद्युङ्गुलीषु- ओं हां हृदयाय नमः।
ओं हीं शिरसे नमः।

ओं हूं शिखायै नमः।
ओं हैं कवचाय नमः।
ओं हौं नेत्रत्रयाय नमः।

करमध्ये- ओं हः अस्त्राय नमः। इति विन्यस्य।

वामदक्षिणकारौ तदितकराभ्यां ओं हैं कवचाय नमः। इति अवकुण्ठ्य

करद्वयं संयोज्य ओं हां शिवाय वोषडिति मूलेन परमीकुर्यात्।

ततोऽङ्गन्यासं कुर्यात्। दक्षिणाङ्गुष्ठानामिकाभ्यां- ओं हां शिवासनाय नमः। इति हृदि मूलाधारात्समुद्भूतं श्वेतं शिवासनपङ्कजं विन्यस्य। ओं हां हं हां शिवमूर्तये नमः। इति नाभिकन्दादिभ्रूमध्यपर्यन्तं तेजोमयीं शिवस्य सूक्ष्ममूर्तिं विन्यस्य।

मुष्टिं बध्वाङ्गुष्ठेन ओं हों ईशानमूर्ध्ने नमः। इति मूर्ध्नि।
अङ्गुष्ठतर्जनीभ्यां- ओं हें तत्पुरुषवक्त्राय नमः। इति मुखे।

अङ्गुष्ठमध्यमाभ्यां- ओं हूं अघोरहृदयाय नमः। हृदये।

अङ्गुष्ठानामिकाभ्यां- ओं हीं वामदेवगुह्याय नमः। इति गुह्ये।

अङ्गुष्ठकनिष्ठिकाभ्यां- ओं हां सद्योजातपादाभ्यां नमः। इति पादयोः विन्यस्य

भ्रूमध्यादि ब्रह्मरन्ध्रान्तं ओं हां हौं विद्यादेहाय नमः। इति अङ्गुष्ठानामिकाभ्यां विद्यादेहं विन्यस्य

ओं हां नेत्रेभ्यो नमः। इति नेत्रेषु

मध्यमाङ्गुलीभिस्तिसृभिः विन्यस्य

तस्मिन्नङ्गुष्ठानामिकाभ्यां- ओं हां हौं शिवाय नमः। इति शिवमावाहयेत्।

ओं हां हृदयाय नमः। इत्यङ्गुष्ठकनिष्ठिकाभ्यां हृदये।

ओं हीं शिरसे स्वाहा इति अङ्गुष्ठानामिकाभ्यां शिरसि।

ओं हूं शिखायै वषडिति अङ्गुष्ठमध्यमाभ्यां शिखायां।

ओं हैं कवचाय हुं इत्यङ्गुष्ठतर्जनीभ्यां कण्ठप्रावरणत्वेन स्तनमध्यान्तं कवचं।

हौं नेत्रत्रयाय वोषडिति मध्यमाङ्गुळिभिः नेत्रयोः।

ओं हः अस्त्राय फडिति करमध्ये तालत्रयपुरस्सरं दिग्बन्धनं कृत्वा कवचेनावगुण्ठ्य ओं हृदयाय वौषडिति मूर्धादिपादपर्यन्तं महामुद्रां प्रदर्शयेत्॥

ततः शिवसमानरूपतामात्मानं चिन्तयेत्॥
इति सकलीकरणम्॥

६. अथ भूतशूद्धिः॥

ओं हीं विद्यातत्वाय हुं फडिति पादयोः
ओं हूं शिवतत्वाय हुं फडिति शिरसि।
इति तत्वत्रयं संशोध्य
ओं लं कं पृथिव्यै नमः पादयोः
ओं वं खं अद्भ्यो नमः जात्वोः
ओं रं गं तेजसे नमः नाभौ

ओं यं घं वायले नमः ग्रीवाया
ओं हं ङं आकाशाय नमः ललाटे

इति भूम्यादि पञ्चाभूतानि स्वशरीरे सम्पूज्य, स्वशरीरं पूर्णवटवृक्षवत्सम्भाव्य आत्मानं संहारमुद्रया द्वादशान्ते नियोज्य

''अस्य शरीरस्य छेदन शोषण दाहन प्लावनपिण्डीकरण प्राणप्रतिष्ठाञ्च करिष्ये''॥

इति सङ्कल्प्य।

''पञ्चवक्त्रं महाघोरं दशबाहुं त्रिलोचनम्।
विकृतं भासुरं जोग्रं पिङ्गभ्रूश्मश्रुमूर्धजम्॥
खड्गखेटक नाराच धनुस्सूत्र कमण्डलून्।
शक्तिं शूलञ्च परशुं वहन्तं ब्रह्मदण्डकम्॥
एकपादं द्विपादं च समपादचतुष्टयम्॥
सर्वाङ्गभुजगोपेतं नागयज्ञोपवीतिनम्॥
एवं ध्यात्वा भजेदस्त्रं प्रणतार्तिविनाशनम्॥

ओं श्लीं पशुं हुं फडिति पञ्चचतुस्त्रिह्येकोद्घातक्रमेण पाशच्छेदनं विभाव्य, ओं ह्यौमिति वायुबीजेन देहपादपं संशोष्य, पादाङ्गुष्ठादि शिरोन्तं ओं ह्रूमित्यग्निबीजेन सन्दह्य, शरीरं दग्ध रज्जुवत्सम्भाव्य, ओं ह्वीमित्यमृतबीजेन सम्प्लाव्य, ओं ह्लामित्यचला बीजेन तद्भस्म पिण्डीकरणं विभाव्य, ओं हामित्याकाशबीजेन जीवात्म परमात्मनोरैक्यं सञ्चिन्त्य, ओं हां ह्यौं ह्रूं ह्वीं ह्लामित्याकाशादि पृथिव्यन्तमुत्पाद्य, आत्मानं षुखमिति सम्भाव्य स्वशरीरे शिवतनुं सञ्चिन्त्य, शिवमयमात्मानं पञ्चकलया प्रणवेन पूरकेण सृष्ट्या समानीय द्वादशान्तस्थमात्मानं ज्योतीरूपं हृत्कमले संस्थाप्य प्राणप्रतिष्ठां कृत्वा, दण्डभङ्गी मुण्डभङ्गी वक्त्रभङ्गी कलाभङ्गी अन्तर्मातृका बहिर्मात्कान्यासं

मन्त्राक्षरन्यासं अष्टत्रिंशत्कलान्यासं श्रीकण्ठकला-मातृकान्यासं षडध्वन्यासादींश्च कृत्वा अन्तर्यागं कुर्यात्।

इति भूतशुद्धिः॥

७. अथान्तर्यागमक्रमः॥

अर्घ्यादिकं मूलेन शिवतीर्थमिति विभाव्य, अमृतीकृत्य मूलेनात्मानं सम्प्रोक्ष्य, भ्रूहृन्नभिदेशे सूर्यसोमाग्निमण्डलं विचिन्त्य, हृदये सोममण्डले माणिक्यवर्ण नाभिकन्दसमुत्थितनीलवर्ण नाळान्वित-धवलवर्णाष्टदल-हृदयकमलकर्णि का-संस्थित-कुण्डलिनी शक्तिरूपं जीवात्मके पीठे श्रवणाङ्गुष्ठसंयोगादिगम्य नादारूपदीपशिखाकारं लिङ्ग विचिन्त्य, शिवासनमभ्यर्च्य, लिङ्ग शिवमूर्तिं विद्यादेहं चाभ्यर्च्य, तत्र परमशिवमा-वाहनादिक्रमेणाभिपूज्य, द्वादशान्तस्त्रुतामृत धारयाऽभिषिच्य, वस्त्राभरणादि समर्प्य, वैराग्यचन्दनेनानुलिप्य। अहिंसेन्द्रियनिग्रह क्षमा दया ज्ञान तपः सत्यभावाख्यैः अष्टपुष्पैरभ्यर्चयेत्।

ततः मनःपात्रे प्राणाग्नावहङ्काररूपधूपं शिवज्ञानमेव दीपं प्रत्याहृतं मनोनैवेद्यं गुणत्रयात्मकताम्बूलञ्च समर्प्य, प्रदक्षिणनमस्कारान्तं मनसा परिकल्प्य, नाभिकुण्डे अग्निमण्डले ज्ञानाग्निं प्रज्वाल्य, विद्या देहवन्यािसपुरस्सरं शिवमूलमन्त्रेणाष्टवारं जुहुयात्।

शाक्तामृतघृतपरिपूर्णनाभिकन्दकलशां हृदयकमलात्मककुसुमां विभाव्य, तया हुं शक्तये वौषडिति पूर्णहुतिं हुत्वा होमसन्तर्पितं शिवाग्निं नाभिमार्गेण हृत्पद्मपूजिते शिवे संयोज्य, अष्टपुष्पैरभ्यर्च्य, क्षमस्वेति विज्ञाप्य पूजां समर्पयेत्।

तदनन्तरं- भ्रूमध्ये सर्वावयसम्पूर्णं शुद्धदीपसमाकृतिं शिवं सकलनिष्कलस्वरूपेण ध्यात्वा शिवः पूज्यपूजकभावेन द्विधा स्थितः शिवोऽहमिति मनसि शिवः आदधीत इत्यन्तर्यागः॥

इत्यात्मशुद्धिक्रमः॥

(२)

अथ स्थानशुद्धिः॥

स्थानशुद्धर्थमस्त्रमन्त्रेण हस्तमात्रमण्डले कृत्वा ओं हां हृदयाय नमः इति सर्वाभरणभूषितां धरां गन्धादिभिरभ्यर्च्य धनुर्धराय इति भूगायत्र्याभ्यर्च्य उर्ध्वाभिमुखौ करौ कृत्वा ओं हः अस्त्राय फडिति तालत्रयेण तथा छोटिकया दशादिक्षु विघ्मानुत्सार्य ओं हां शिवास्त्राय फडिति तालत्रयेण तथा छोटिकया दशादिक्षु विघ्मानुत्सार्य ओं हां शिवास्त्राय नमः इति मन्त्रेण ज्वलदग्निवर्णं प्राकारत्रयं विभाव्य ओं हां कवचाय नमः इति छोटिकाभिः परितो परिघान् कृत्वा ओं हां शिवास्त्राय नमः ओं ह्रीं शक्तये वौषडिति ऊर्ध्वाधः परिचिन्त्य विभाव्य महामुद्रां प्रदर्श्य सम्प्रदायक्रमेण स्वस्तिपुण्याहवाचनं कुर्यात्॥

इति स्थानशुद्धिः॥

(३)

अथ द्रव्यशुद्धिक्रमः॥

ततः द्रव्यशुद्ध्यर्थं पूजोपकरणयोग्द्रव्यपात्राणि यथालाभं सर्वद्रव्यजालञ्च सन्निधीकृत्य

ओं हां शिवाय नमः इति मूलेन निरीक्ष्य।
ओं हां हृदयाय नमः- इति गन्धजलेन प्रोक्ष्य
ओं हां शिवास्त्राय नमः- इति संरक्ष्य
ओं हां कवचाय नमः-द इत्यकुण्ठ्य

अमृतीकृत्य स्वर्णादिनिर्मितपाद्यादिपात्राणि शङ्ख ज्चास्त्रेण प्रक्षालयेत॥

त्रिपादिषु-ओं हां सत्वाय नमः
ओं हां रजसे नमः
ओं हां तमसे नमः

वलयेषु - ओं हां ब्रह्मणे नमः
ओं हां विष्णवे नमः
ओं हां रुद्राय नमः।

इत्यभ्यर्च्य तदुपरि दर्पणोदरसन्निभां स्थलिकां विन्यस्य

ओं हां सूर्यमण्डलाय नमः
ओं हां सोममण्डलाय नमः
ओं हां वह्निमण्डलाय नमः

इति मण्डलत्रयं सम्पूज्य पाद्यादिपात्राण्युक्तक्रमेण विन्यसेत्।

मध्यस्थाने विशेषार्घ्यमैन्द्र्यां निरोधार्घ्यं दक्षिणादिशि, पराङ्गखार्घ्यमुत्तरदिशि, आचमनपात्रं प्रतीच्यां, पाद्यपात्रमग्रे, शङ्खंवर्धिनीं पूर्वस्यां, मण्डलोपरि पञ्चमृतपात्रणि, पश्चिममण्डलोपरि पञ्चगव्यपात्राणि, उत्तर मण्डलोपरि स्नपनकलशान् प्राच्यामाग्नेय्यां वा गन्धपुष्पादिद्रव्यपात्राणि च, मूलेन विन्यस्य मूलं पञ्चवारं जप्त्वा तत्त्वदृष्ट्या निरीक्ष्य अस्त्रेण वर्धन्यां गन्धतोयेनापूर्य एलालवङ्गकर्पूराद्युक्त सुगन्ध द्रव्याणि तन्मन्त्रेण तेषु पृथक् पृथक् विन्यसेत्।

निरीक्षणादिभिः शुद्धां घण्टा तन्मन्त्रेण सन्ताड्य देशकालौ संकीर्त्य प्रातःकाले सौरादिचण्डान्तं सायंकाले चण्डादिक्षेत्रपालान्तं इतरसन्धिपूजासु तत्तत्कालस्मरणपूर्वकं संकल्प्य वर्धनी कलशं गन्धपुष्पादिभिरभ्यर्च्य आपो वा इमं में गङ्गे इति द्वाभ्यामभिमन्त्र्य

गङ्गे च यमुने चैव गोदावरि सरस्वति।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु॥

इति सम्प्रार्थ्य, तन्मध्ये शिवामावाह्या, मूलेन पञ्चोपचारैः सम्पूज्य, शङ्खताक्ष्यधेनुमुद्राः प्रदर्श्य, अमृतीकृत्य, तत्तोयेन शङ्ख

ह्यन्मन्त्रेण प्रक्षाल्य, वर्धनीकलशजलेन शङ्ख पूरयित्वा, ओं हां पाञ्चजन्याय नमः इति गन्धपुष्पाक्षतैरभ्यर्च्य, पञ्चब्रह्मषडङ्गैरावाह्य, एकादशवारं पाञ्चजन्यगायत्र्या शिवगायत्र्या च पाञ्चजन्यमभिमन्त्र्य, पद्म महामृगीमुद्राश्च दर्शयित्वा, धूपदीपौ दत्वा, वर्धन्यां शङ्खोदकं किंचित्-प्रक्षिप्य, शङ्खोदकेन विशेषार्घ्यादिपात्राणि प्रोक्षयेत्।

इति द्रव्यशुद्धिः॥

(४)

अथ मन्त्रशुद्धिः।

हृद्यञ्जलिं बध्वा, बिन्द्वन्तं ब्रह्मरन्ध्रान्तं शिखान्तं वा ह्रस्वदीर्घप्लुतप्रणवादि नमोन्ततया क्रमेण त्रिवारं शनैः मूलमन्त्रोच्चारणं कृत्वा, ब्रह्माङ्गानि प्रसादं शिवबीजं चापि एवमेवोच्चारणं कुर्यात्॥

॥ इति मन्त्रशुद्धिः॥

(५)

अथ लिङ्गशुद्धि॥

अथाचार्यः मूललिङ्ग सन्निधिमुपगम्य
ओं हां धर्मासनाय नमः
ओं हां ज्ञानासनाय नमा
ओं हां वैराग्यासनाय नमः
ओं हां ऐश्वर्यासनाय नमः

ओं हां पद्मासनाय नमः। इति सम्पूज्य
घण्टानादपूर्वकं लिङ्गशुद्धिं कुर्यात्।

अभिषेकपात्रमस्त्रमन्त्रेण सङ्गृह्य मूलेन जलमापूर्य तन्मध्ये इमं में गङ्गे इत्यादिना तीर्थानावाह्य धूपदीपौ समर्प्य पञ्चब्रह्मषडङ्गमन्त्रपूर्वक मस्त्रेण दिग्बन्धनामृतीकरणे कृत्वा

मूलेनाभिषेकोदकेन संयोज्य

ओन्नमो देवदेवेश सर्वलोकैकनायक।
उत्तिष्ठ स्नानकर्मार्थंमात्मरक्षार्थमेव च॥

यो रुद्रो अग्नाविति देव सम्प्रार्थ्य प्रच्छन्नपटं धृत्वा लिङ्गे पूर्वेद्युः (रात्रौ कृतां पूजां हृदयमन्त्रेण विभाव्य शिरसि लिङ्गमस्तकोपरि) ईशानादि क्रमेण स्वाहान्तमूलेन शिवगायत्र्या वा सामान्यार्घ्यजलेनाऽर्घ्याणि दत्वा धूपदीपौ प्रदर्श्य अङ्गुष्ठादि कनिष्ठातमीशनादि पञ्चकं विन्यस्य कनिष्ठिकानामिकाभ्यां नवपुष्पं सङ्गृह्य अङ्गष्ठतर्जनीभ्यां लिङ्गमस्तकान्निर्माल्यं हृदयमन्त्रेणाऽवरोप्य गृहीतनवपुष्पं शिवगायत्र्या मूलेन च लिङ्गमूर्ध्नि समर्प्य निर्माल्यमैशान्यां दिशि पूर्ववद्धृदय मन्त्रेण चण्डार्थं शुद्धपात्रे संरक्षेत्।

प्रमुञ्च धन्वन इति- शिवास्त्रमन्त्रेण च लिङ्ग, पाशुपतास्त्रमन्त्रेण पीठञ्च प्रक्षाल्य- ओं हां हृदयाय नमः स्वाहा। इति शुद्धजलेनाऽभिषिच्य-ओं हां हीं शिवशक्तिभ्यां नमः। इति लिङ्गपद्ममुद्रे प्रदर्श्य गर्भावरण पूजयेत्।

इति लिङ्गशुद्धि॥

II

प्रथमं कायशुद्धिः स्यादात्मशुद्धिरतः परम्।
पुष्पशुद्धिर्यथामन्त्रं स्थानशुद्धिस्तथैव च॥
द्रव्यशुद्धिस्तथा मन्त्रलिङ्गशुद्धिरतः परम्।
पीठशुद्धिस्तथैवं स्यादासनं कल्पयेत्क्रमात्॥
एवं दशप्रकारेण पूजयेत्परमेश्वरम्।

(कायशुद्धिरात्मशुद्धिश्च)

शौचमाचमनं स्नानं तर्पणं विधिपूर्वकम्॥
कृत्वा प्रविश्य हर्म्यं तु त्रिःकृत्वा तु प्रदक्षिणम्।
उत्तराभिमुखो भूत्वा रुचिरासनसंस्थितः॥
दशदिग्बन्धनं पूर्वं कृत्वास्त्रेणैव देशिकः।
करपूजा प्रकर्तव्या गन्धपुष्पादिना पुरः॥
दहनाप्लावनं कुर्यान्नाडीशोधनकर्मभिः।
प्राणो वै त्रिः प्रकर्तव्यः प्राणायामेन सुव्रत॥

(करन्यासः)

करन्यासं ततः कुर्याद्देहन्यासमतः परम्।
गृहस्थः सृष्टिमार्गेण ब्रह्मचारी स्थितिक्रमात्॥
वानप्रस्थयतीनां च संहारन्यास उच्यते।
ईशानादीनि सद्यान्तमङ्गुष्ठादिक्रमेण तु॥
कनिष्ठान्तं न्यसेद्धीमान्सृष्टिन्यास उदाहृतः॥
मध्यादि तर्जन्यन्तं (च) स्थितिन्यास उदाहृतः॥
कनिष्ठाद्यङ्गुष्ठातं च सद्यादीनि क्रमान्न्यसेत्।
संहारन्यास एवोक्ताः शिवे तु परमात्मनि॥

अङ्गुल्या तु न्यसेत्पर्व तर्जन्याङ्गुष्ठके न्यसेत्।
हृदयाद्यस्त्रपर्यन्तं मध्यमादि तु विन्यसेत्।
तलयोस्तर्जन्यन्तं च सर्वेषु विन्यसेद्बुधः।
तलयोर्विन्यसेन्नेत्रमस्त्रं तर्जनि विन्यसेत्।
शिवमन्त्रं न्यसेद्धीमान्करशाखासु पर्वसु।
करन्यासस्त्वयं प्रोक्तो ह्यङ्गन्यासमथ श्रुणु॥

(अङ्गन्यासः)

मुर्धादिपादपर्यन्तं सृष्टिन्यास उदाहृतः।
हृदादिपादपर्यन्तं स्थितिन्यास उदाहृतः॥
पादादिमूर्धपर्यन्तं संहारन्यास उच्यते।
एवं न्यासत्रयं कृत्वा स्थावरे जङ्गमे बुधः।
स्थावरं लिङ्गमित्याहुर्जङ्गम तस्य पूजकः।
अन्तर्यागमतः कुर्यादर्चयेदात्मदैवतम्॥
हृत्पद्मकर्णिकामध्ये ओंकारमयमीश्वरम्।
ध्यायेद्यजनसहितं सदाकालं यजेद्बुधः॥
चिन्तयेन्मनसा पूर्वं गुणांस्तत्र गुणत्रयम्।
ततः प्रच्छाद्य च तमो रजः सत्त्वेन साधयेत्॥
ध्यायेत्त्रिमण्डलं पूर्वं धूम्यं रक्तं सितं क्रमात्।
उत्सृज्य प्राकृतं भावं शिवोऽहमिति भावयेत्।
एवं कृत्वा विशेषेणान्तर्यागं समाचरेत्॥
नाभिवक्रं समाश्रित्य कारयेद्वह्निमण्डलम्।
हृदये धारयेत्सोमं भ्रूमद्ये रविमण्डलम्।
हृदये यजनं कुर्याद्धोमं नाभौ प्रकल्पयेत्।
तथेश्वरं तु भ्रूमद्ये ध्यायेत्सर्वगतं प्रभुम्॥
पञ्चावरणमार्गेण पूजयित्वा विशेषतः।
हृत्पद्मे चार्चयेन्नित्यं त्रिकालं वा द्विकालकम्॥

अथवाप्येकालं वा संयजेन्मानसेन तु।
आत्मशुद्धिरिति प्रोक्ता .... ॥

(पूर्वकारणे ३०, १३७-१४१)

सत्वोपरि गुणातीतं पुरुषं पञ्चविंशकम्॥
ऐश्वर्यपङ्कजं नित्यं पुरुषोपरि संस्थितम्।
द्वादशाङ्गुलविस्तीर्णं शुक्लं विकसितं शुभम्॥
नालमष्टाङ्गुलं ज्ञेयं नाभिकन्दसमुद्भवम्।
पद्मपत्राष्टकं ज्ञेयमणिमादिगुणाष्टकम्॥
कर्णिका केसरं ज्ञानं नालं वैराग्यमेव हि।
पार्थिवाण्डमधः कन्दमिति पद्मं विचिन्तयेत्॥
धर्मज्ञाने च वैराग्यमैश्वर्यादि समन्वितम्।
ध्यात्वा पद्मासनं ह्येवं सर्वपापहरं परम्॥
तत्पद्मकर्णिकामध्ये शुद्धदीपसमाकृति।
आवृतेषु दलेष्वष्टौ ओं शिवाय नमो नमः॥
इन्द्रादीशानपर्यन्तं न्यसेदष्टाक्षरं क्रमात्।
रुद्ररूपं वरं व्यक्तमानन्तमचलप्रभम्॥
युगाङ्गलप्रमाणेन नित्यं निष्कलदीपवत्।
अर्चयेदष्टपुष्पैस्तु शिवमोंकारूपिणम्॥
तृतीयं तु दयापुष्पं चतुर्थं क्रोधवर्जितम्॥
पञ्चमं कृतिमात्सर्यं षष्ठमं भावपुष्पकम्।
सप्तमं ध्यानपुष्पं च समाधि श्चाष्टपुष्पकम्॥
सर्वोपचारान् मनसा ध्यात्वा तं पूजयेच्छिवम्।
प्राकृतं भावमुत्सृज्य शिवोऽहमिति भावयेत्॥
आत्मशुद्धिरियं प्रोक्ता; पुष्पशुद्धिमथ श्रृणु।
स्नानारम्भे तदन्ते तु अर्चनान्ते निवेद्यके॥
होमान्ते चोत्सवान्ते तु नृत्तान्ते घोषयेत्क्रमात्।

घण्टायास्तु ध्वनिं श्रुत्वा राक्षसानां विनाशनम्॥

(स्थानशुद्धिः)

स्थानशुद्धिं ततः कृत्वा गोमयेनोपलेपयेत्।
तन्मध्ये वसुधां यष्ट्वा दिग्बन्धं चास्त्रमन्त्रतः॥
स्थानशुद्धिरिति ख्याता .... ॥

(द्रव्यशुद्धिः)

पाद्याचमनपात्रकम्।
अर्घ्यपात्रं शरावं च शङ्खं भाण्डं च क्षालयेत्॥
निरीक्ष्य हृदयेनैव कवचेनावकुण्ठयेत्।
वस्त्रपूतेन तोयेन वर्धनीं च प्रपूरयेत्॥
पञ्चब्रह्मषडङ्गैश्च शिवमन्त्रेण तज्जलम्।
धेनुमुद्रां दर्शयित्वा सर्वपात्राणि प्रोक्षयेत्॥
यववेणूंस्तथा दूर्वाः कुशांश्चैव शिवाम्भसा।
पाद्यादिसर्वपात्राणि साधयेत् विचक्षणः॥

(पाद्यम्)

चन्दनं कुङ्कुमं तोयमुशीरं शुक्लसर्षपः।
यवो वेणुस्तथा दूर्वा उत्तमं पाद्यमुच्यते॥
यवसिद्धार्थ दूर्वं च चन्दनोशीरसंयुतम्।
मध्यमं पाद्यमेवं स्यादुशीरं चन्दनं जलम्॥
कन्यसं पाद्यमित्युक्तं प्रत्येकं धारणं पलम्।
तदर्धमधमं प्रोक्तं तदर्धं कन्यसं भवेत्॥

(आचमनीयकम्)

एलालवङ्गकर्पूर मुरा तोयमुशीरकम्।
सर्वं जातिफलैर्युक्तं श्रेष्ठमाचमनीयकम्॥

लवङ्ग चैव कर्पूरं त्रुटिजातिमुरं जलम्॥
मध्यमाचमनीयं स्यात्त्रुटिभस्म तथा जलम्॥
लवङ्गेन समायुक्तं कन्यसाचमनं स्मृतम्।
एतेषां तु प्रमाणं तु प्रागुक्तविधिना कुरु॥

(अर्घ्यम्)

तिलव्रीहिकुशाग्रैश्च आपःक्षीरयवैस्तथा।
तण्डुलैः सर्षपोपेतमर्घ्यमष्टाङ्गमुच्यते॥
तण्डुलो यवसिद्धार्थमाढकी शालिसंयुतम्।
मध्यमार्घ्यमिदं प्रोक्तं शालितण्डुलतोयकम्॥
कन्यसार्घ्यमिदं प्रोक्तं प्रमाणं पूर्ववत्कुरु।
द्रव्यालाभे तु तोयं च चन्दनं च कुशैः सह॥
पाद्यादीनां त्रयं कल्प्य कलप्तपात्रेषु बुद्धिमान्।
फलत्रयं तथा भस्म कुङ्कुमं चन्दनं धनम्॥
पत्रलोहमुशीरं च भागान्वक्ष्ये पृथक् पृथक्।
व्योमपक्षाग्न्यश्रबाणान् कौशिकं चैवमादरात्।
शीतारिद्रव्यमेवोक्तं मधु प्लाव्याथ तेन तु॥
उत्तमं धूपमाख्यातं शिवप्रीतिकरं भवेत्।
चन्दनं चैव निर्यासं कृष्णलोहं क्रमेण तु॥
अग्निपक्षैकभागं तु किंचिद्भस्मविमिश्रितम्।
मध्यमं धूपमाख्यातं गुग्गुलुघृतसंयुतम्॥
कन्यसं धूपमाख्यातं किंचित्कर्पूरमिश्रितम्।

(अर्घ्यादिविनियोगकालः)

आवाहनान्ते पूजान्ते विसर्जनेऽर्घ्यं प्रदापयेत्॥
अर्घ्ये विलेपने स्नाने त्रिषु गन्धं सुयोजयेत्।
आवाहनार्घ्यपाद्येषु स्नाने धूपे विलेपने॥

नैवेद्ये च विसर्गे च पुष्पमष्टसु योजयेत्॥
तत्कालं तु विसृज्याथ सप्तवारि नियोजयेत्॥
स्नानोदकं च पाद्यादि गन्धपुष्पनिवेद्यकम्।
क्षीरं दधिघृतादीनि प्रोक्षयेत्तु शिवाम्भसा॥
द्रव्यशुद्धिर्भवेदेव मन्त्रशुद्धिमथ श्रृणु।

(मन्त्रशुद्धिः)

ओंकारदीपिता मन्त्रा नमस्कारान्तयोजिताः॥
अर्चने तु प्रयोक्तव्या मन्त्राश्चामोघशक्तयः।

(यवनिकाया आवश्यकता)

अस्त्रेणैव तु मन्त्रेण महाघण्टां प्रताडयेत्॥
क्षिपेत्ततो यवनिकां ब्रह्ममन्त्रं समुच्चरन्।
वेदविक्रयकाश्चापि तन्त्रविक्रयका अपि॥
पापक्रूरपरिभ्रष्टनास्तिकाः श्रुतिदूषकाः।
दुश्चर्मकुष्टसंयुक्ताः शिवद्रव्यापहारिणः।
गुरुद्रव्यापहारी च गुरुरोगी च पातकी।
दुर्मुखश्च दुराचारो मूर्खाश्च गुरुनिन्दकाः॥
कुनखाः कुब्जकाश्चैव गोलका एकचक्षुषः।
अङ्गहीनः सुरासेवी वेश्यमिश्रणचारिणः॥
लिङ्गच्छेदकविच्छिन्नावर्जयेच्छिवदर्शने।
प्रमादादर्चनं कृत्वा तत्पूजा निष्फला भवेत्॥

(प्रच्छन्नटकालः)

त्रिकालेषु पटं दत्वा स्नाने धूपे तथोत्सवे।
शेषकालेषु सर्वेषु पटं न परिवेष्टयेत्॥
अथवान्यप्रकारेण पटकालो विशेषतः।
पूजाकाले तु नैवेद्ये पुष्पालंकरणे ततः॥

मुद्रादर्शनकाले तु हेमरत्नादियोजने।
एवमादिषु कालेषु प्रच्छन्नपटमारभेत्॥

(लिङ्गशुद्धि पीठशुद्धिश्च)

लिङ्ग चतुर्विधं ज्ञात्वा शोधयेदस्त्रमन्त्रतः।
प्रोक्षणं पुनराह्वनं पुरश्चरणमेव हि॥
स्थापिते मानुषैर्लिङ्गे सर्वकर्माणि कारयेत्।
ज्ञात्वा तु लिङ्गमाचार्यस्तल्लिङ्ग हृदयेन तु॥
लिङ्गपीठस्थलं सर्वं शुद्धं कृत्वा शिवाम्भसा।
शोधयेद्देविकं लिङ्ग स्थानजं हृदयेन तु॥
आर्षं तु योगजं चैव भूतजं चैव गाणपम्।
मानुष रत्नंज लिङ्ग बाणलिङ्ग विशेषतः॥
शोधयेदस्त्रमन्त्रेण शुद्धतोयेन देशिकः।
लिङ्गस्य मूर्धदेशे तु पञ्चमेन तु संस्पृशेत्॥
लिङ्गस्य मुखदेशे तु नरमन्त्रेण संस्पृशेत्।
लिङ्गपार्श्वे तु दक्षे स्यादघारेण तु संस्पृशेत्।
लिङ्गस्य वामपर्श्वे। तु वामदेवेन संस्पृशेत्।
पृष्ठान्तं संस्पृशेत्पादौ सद्योजातेन मन्त्रतः॥
उन्मनीमूलमन्त्रेण पीठशुद्धिं तु कारयेत्।
महापट्टेरुपानान्तं देवयङ्गानि च संस्पृशेत्॥
लिङ्गशुद्धि समाख्याता; पश्चात्संपूजयेद्गुरुम।

III

(१)

आत्मशुद्धिः॥

देह शुद्धि भूतशुध्यादि॥

सिद्धान्तशेखरे-

षडध्वस्थानि बाह्यानि तानि शुद्धानि दीक्षया॥
देहस्थितानि शोध्यानि भूतानि स्युर्दिने दिने।
चरणांगुष्ठयोर्युग्मात् संचिन्त्य सुषिरं तनौ॥
सुषिरन्तर्बहिशक्तिं व्यापिनीं चिन्तयेत् ततः।
हुंकारे रंध्रमध्यस्थे प्रज्वलत्पावकप्रभे॥
विधाय प्राणसंरोधं चित्तमत्र निवेशयेत्।
रेचकान्ते फडान्तेन हृत्कंठेषु च तालुषु॥
भ्रूमध्ये ब्रह्मरंध्रे च भित्वा ग्रन्थीन् निवर्त्य च।
हुंकारं तारकाकारं जीवं हृदयसंपुटम्॥
पूरकाहृत चैतन्यं हुं शिखोपरि विन्यसेत्।
संशुद्धं बिन्दुभूतं च ध्यात्वा कृत्वा च कुंभकम्।
रेचकेन शिखे विद्वान् एकोद्घातेन योजयेत्।
संहारमुद्रामादाय मुक्तिमंत्रेण विग्रहात्॥
भोग्यकर्मोपभोगार्थं द्वादशान्तपदे यथा।
बीजवृत्या शिवे लीन प्रतिलोमं स्वहेतुषु॥

तत्व शुद्धिः॥

तत्वानि बिन्दुपर्यन्तं लयं नीत्वा विशोधयेत्।
गंधे भूस्सलिलं रसे हुतवहो रूपे मरुत्स्पर्शने

शब्दे स्यात् खमहंकृतौ पुनरिमास्तान्मात्रकास्तामसे।
कर्माक्षाणि च राजसे सहमनोबुद्धीन्द्रियैस्सात्विके
बुद्धौ तच्च गुणेषु सागुणगणे व्यक्तेन लयं गच्छति॥
तद्रागविद्ये च कलां प्रयन्ति पुंस्त्वंच कालो नियतिः कला च।
मायासु विद्येशमसौ सदेशं सशक्तिमेष शिवमेष बिन्दुः॥
एवं विधाय संशुद्धिं पंचभूतानि शोधयेत्॥
पृथ्वी वातौ पयो वह्नी द्वौ द्वौ शोध्यौ परस्परौ।
आकाशं चाविरोधेन यथा शोध्यं तदुच्यते॥

कलाशुद्धिः॥

पार्थिवं मंडलं पूतं कठिनं वज्रलाञ्छितम्।
ह्लामित्यात्मीयबीजेन तन्निवृत्तिकलामयम्॥
तप्तचामीकराकारा चतुर्बाहुविभूषिता।
वज्राभराक्षमालाब्जा निवृत्तिः परिकीर्तिता॥
संयुक्तं सद्यमन्त्रेण सात्विकं ब्रह्मदैवतम्।
पादावाराभ्य मूर्धान्तं विचिन्त्य चतुरश्रकम्॥
उद्घातपंचकेनैव वायुभूतं विशोधयेत्।
अर्धचन्द्र द्रवं (?) सौम्यं शुभ्रमंभोजलांछितम्॥
ह्लीमित्यनेन बीजेन प्रतिष्ठा रूपतां गतम्।
शुद्धस्फटिकसंकाशा एकवक्त्रा चतुर्भुजा॥
पाशाभयाक्षमालाब्जा प्रतिष्ठा रत्नभूषिता।
संयुक्तं वाममन्त्रेण राजसं विष्णुदैवतम्॥
आप्यं चतुर्भिरुद्घातैर्वह्निभूतं विशोधयेत्।
आग्नेयं मंडलं त्र्यश्रं रक्तं स्वस्तिकलांछितम्॥

ह्रांमित्यनेन बीजेन विद्यारूपं विभावयेत्।
पीतभ्रूश्मश्रु पीताक्ष चूडाचन्द्रविभूषिता।।
तप्तचामीकराकारा विद्युज्वलनसन्निभा।
अघोराणु समायुक्तं तामसं रुद्रदैवतम्।।
वह्निंच त्रिभिरुद्घातैः जलंभूतं विशेधयेत्।
षडश्रमंडलं वायुं बिन्दुभिःषड्भिरंकितम्।।
कृष्णं हैमिति बीजेन जातं शांतिकलामयम्।
चतुर्वक्त्र चतुर्बाहुः कृष्णवर्णा महाबला।।
ध्वजाभराक्षमालाब्जा शान्तिः सर्वोपवीतिनी।
तत्पुरुषेण संयुक्तमधिदैवं महेश्वरम्।।
संचित्योद्घातयुग्मेन पृथ्वीभूतं विचिन्तयेत्।
नाभौ बिन्दुमयं भूतं बिन्दुशक्तिविभूषितम्।।
व्योमाकारं सुवृत्तं च शुद्धस्फटिक निर्मलं।
हौकारेण फडन्तेन शान्त्यतीतकलामयम्।।
शुद्धस्फटिकसकाशा एक (पञ्च) वक्त्रा चतुर्भुजा।
पद्माभराक्षमालाब्जा शान्त्यतीता वरप्रदा।।
ध्यात्वैकोद्घात योगेन सुविशुद्धं विभावयेत्।
दक्षिणांगुष्ठपादस्थवह्निना शोधयेत्तनुम्।।
आप्लावयेत्ततस्सर्वं मूलेनामृतवर्षिणा।
आधाराख्य मनंन्तं च धर्मज्ञानादि पंकजम्।।
तत्र चात्मानामाहृत्य ततस्त्वाप्यायनं कुरु।
दिव्यामृतेन संप्लाव्य कुर्वीत सकलीकृतम्।।

सुप्रभेदे-

प्रणवेन समायुक्तं श्वेतपद्मोपरि स्थितम्।
कृत्वा शिवतनुं ध्यायेदष्टविंत्रंशत् कलानयम्।।
ईशानकलांपंचकम्।।

कामिके-

ओं हों ईशानस्सर्वविद्यानां शशिन्यै नमः उर्ध्वमूर्धिन
ओं हों ईश्वरस्सर्वभूतानां अंगदायै नमः पूर्वमूर्ध्नि
ओं हों ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मा इष्टायै नमः दक्षिणमूर्ध्नि
ओं हों शिवो मे अस्तु मरीच्यै नमः उत्तरमूर्ध्नि
ओं हों सदाशिवों ज्वालिन्यै नमः पश्मिमूर्ध्नि

एवमीशानकलापंचक।।

तत्पुरुष कलाश्चतस्त्रः।

ओं हें ततपुरुषाय विद्महे शान्त्यै नमः पूर्ववक्त्रे
ओं हें महादेवाय धीमहि विद्यायै नमः दक्षिणवक्त्रे
ओं हें तन्नो रुदः प्रतिष्ठायै नमः उत्तरवक्त्रे
ओं हें प्रचोदयात् निवृत्यै नमः पश्चिमवक्त्रे

एवं तत्पुरुषकलाश्चतस्त्रः।

ओं हुं अघोरेभ्यस्तमार्य नमः हृदये
ओं हुं अथ घोरेभ्यो मोहायै नमः ग्रीवायां
ओं हुं अघोरक्षायै नमः दक्षिणांसे
ओं हुं घोरतरेभ्यश्च निष्ठायैः नमः वामांसे
ओं हुं सर्वतस्सर्वमृत्यवे नमः नाभौ
हुं सर्वेभ्यो मायायै नमः जठरे
ओं हुं नमस्ते अस्तु रुद्र भयायै नमः वृष्ठे
ओं हुं रूपेभ्यो जरायै नमः उरसि

इति बहुरूपकलाष्टक।।

वामदेव कलास्त्रयोदश॥

ओं हिं वामदेवाय नमो जारायै नमः गुह्ये
ओं हिं ज्येष्ठायै नमः रक्षायै नमः इति वृषणद्वये
ओं हिं रुद्राय नमो रत्यै नमः दक्षिणोरौ
ओं हिं कालाय नमो पालिन्यै नमः इति वामोरौ
ओं हिं कलाकामायै नमः दक्षिण जानुनि
ओं हिं विकरणाय नमः संयमिन्यै नमः वामजानुनि
ओं हिं बलक्रियायै नमः दक्षिण जंघायां
ओं हिं विकरणाय नमो बुध्यै नमः वामजंघायां
ओं हिं बलकार्यै नमः इति दक्षिण स्फिचि
ओं हिं प्रमथनाय नमो धात्र्यै नमः वामस्फिचि
हिं सर्वभूतदमनाय नमो भ्रामण्ये नमः कट्यां
ओं हिं मनोमोहिन्यै नमः दक्षिण पार्श्वे
ओं हिं उन्मनाय नमो भयायै नमः इति वामपर्श्वे
इति वामदेवकालास्त्रयोदश॥

सद्योजात कलाष्टकम्॥

ओं हं सद्योजातं प्रपद्यामि सिध्यै नमः- इति दक्षिणपादे
ओं हं सद्योजाताय वै नमः ऋध्यै नमः- इति वामापादे
ओं हं भवे द्युत्यै नमः- दक्षिणकरे
ओं हं अभवे लक्ष्म्यैनमः- इति वामकरे
ओं हं अनादिभवे मेधायै नमः- इति नासायां
ओं हं अनादिभवे मेधायै नमः- इति नासायां
ओं हं भवस्य मां कान्त्यै नमः- इति शिरसि

ओं हं भव स्वधायै नमः- दक्षिणबाहौ
ओं हं उद्भवाय नमो धृत्यै नमः- इति वामबहौ
इति सद्योजातकलाष्टकम्॥

अष्टत्रिंशत् कलानां तु अष्टत्रिंशच्च शक्तयः।
एवं शक्तिसमोपेतं न्यासं कलासु विन्यसेत्॥
ईशानस्य कलाः पंचमुरुषस्य चतुः कलाः।
अघोरस्य कलाश्चाष्टौ वामदेवे त्रयोदश॥
अष्टौ सद्यकला ज्ञेयाः मकुटादि क्रमान्यसेत्।
कलान्यासमिदं प्रोक्तं अक्षरन्यासमुच्यते॥

अक्षरन्यासम्॥

अजिते-

अकारं कुक्षौ विन्यस्य आकारन्तु ललाटके॥
इ ई च नेत्रयोस्तद्वत् उ उ श्रवणयोस्तथा।
ऋ ॠ कपोलयोश्चैव लृ लृ नासापुटद्वये॥
उत्तरोष्ठे तथैकारं ऐकारमधरोष्ठके।
ओकारं चाप्यथौकारं दंतपंक्तिद्वये न्यसेत्॥
जिह्वायामधस्तालु प्रयोज्योऽथ यथा क्रमात्।
कवर्गं दक्षिणे हस्ते चवर्गं च तथोत्तरे॥
टवर्गमुदरे न्यस्य तपवर्गौ वामपादके॥
यवर्गं दक्षिणे पादे शवर्गं वामपादके॥
हकारं हृदये न्यस्य मूलमन्त्रं च विन्यसेत्।
इति मन्त्राक्षरन्यासं कृत्वा विद्यामयीं तनुम्॥
शिवस्य यादृशं रूपं तादृशं चिन्तयात्मनि।
शिवमन्त्रन्यासमिदमात्मनस्तु सदा कुरु॥

(२)

सुप्रभेदे-

आसनानि च सर्वाणि तथैवावरणानि च।
हृत्पद्मे कल्पयेद्वान्यं यथोक्तं तु यथाविधि॥
नाभिकुंडे स्वतस्सिद्धे चांबुसंस्कारसंयुते।
ज्ञानानलं न्यसेत्तत्र सूर्यायुतसमप्रभम्॥
इति ज्ञानानलनं न्यस्य विशं संपूज्य तत्र वै।
पुराकृष्य पीयुषहविष्यं च शिवाणुभिः॥
अन्तःपूजितदेवाय तत्समर्प्य यथाविधि।
अष्टपुष्पिकया पूज्य ततः पूजां समाप्य च॥
निर्भासितशरच्चन्द्रबिन्दुरूपं महेश्वरं।
ललाटपट्टमध्यस्थं चिन्तयेत् शुभ्रविग्रहम्॥
स्वतन्त्रः क्रीडति प्रीतः सततानन्तचेतनः।
ध्यायतः सततं पुंसः सत्यं सत्यं वरानने॥
प्रत्यक्षो भवति क्षिपं हृदि तस्य न संशयः।
चित्तेन जनितं चैव दर्पणे प्रतिबिंबवत्॥
तस्मात् सर्व प्रयत्नेन ध्याननिष्ठस्सदा भवेत्।
ध्याननिष्ठं यदा चितं तदा बाह्यं परित्यजेत्॥
अन्यथा यस्त्यजेन्मोहादुभयं तस्य नश्यति।
तस्मात् बाह्यां तदा कार्यं भूतशुद्धिपुरस्सरम्॥
बहिः पूजामिति प्रार्थ्य लब्धानुज्ञस्ततो मुनिः।
स्थानशुद्धिं ततः कुर्यात् शास्त्रयुक्तेन कर्मणा॥

बहिः पूजास्थानशुद्धिः॥

शिवधर्मे-

पश्यन् परिहरन् जन्तून् मार्जन्या मृदु सूक्ष्मया।
शनैस्सम्मार्जनं कुर्यात् चान्द्रायणफलंलभवेत्॥

सम्मार्जनशतं पुण्यं सहस्रमनुलेपनम्।
यः कुर्यात् सर्वकार्याणि वस्त्रपूतेन वारिणा॥
स मुनिः त महासाधुः स योगी स शिवं व्रजेत्।
अस्त्रेणोच्चयाटयेद्विघ्नं ताळशब्दत्रयेण तु॥
छोटिकाभिर्दिशाबन्धं प्रकारं चास्त्रत्रमंत्रतः।
खेयं तु कवचेनाथ कृत्वा बाह्यन्तरस्थितम्॥
शक्तिजालमतश्चोर्ध्वं दर्शयेद्धेनुमुद्रया।
स्थानशुद्धिरियं प्रोक्ता द्रव्यशुद्धिं ततः श्रृणु॥

(३)

द्रव्यशुद्धिः पात्रविशेषम्॥

शिवधर्मे-

स्वर्णादि निर्मिते पात्रे पाद्यादीन् परिकल्पयेत्।
सुश्रेष्ठं स्वर्णपात्रं तु रजतं मध्यमं भवेत्॥
कन्यसं ताम्रपात्रं तु अलाभे मृण्मयं भवेत्।
मृण्मयं प्रत्यहं कार्यं तच्च नूतनमिष्यते॥
पलाशपद्मपत्राभ्यां ताम्रपात्रसमं भवेत्।

पात्रशुद्धिः॥

तंत्रसारे-

सप्तवारेण कांस्यायस्तंडुलं भस्ममृज्जलैः॥
त्रिधा ताम्रं च धरणी तिंत्रिण्या गोमयेन च।
एकधा हेमरौप्यात्मदारुदंतांशुकान् तथा॥
एवं स्वर्णादि पात्राणां एवं एवमस्त्रांबु शोधितम्।

द्रव्यशुद्धि मंत्रम्॥

अजिते-

निरीक्ष्य हृदयेनैव कवचेनावकुंठयेत्॥

बिन्दुप्रसृतपीयूषपुष्पतोयाक्षतादिना।
हृदि नाभौ षडन्तेन पूरयित्वाभिमंत्रयेत्॥
मंत्रसंहितया तेषु तत्तद्द्रव्याणि चाक्षिपेत्।

पाद्यम्॥

सुप्रभेदे-

उशीरं चन्दनोपेतं दूर्वा सिद्धार्थसंयुतम्॥
चतुर्द्रव्य समायुक्तं पाद्यमेतदुदाहृतम्।
एला लवंग कर्पूर जंबू जाति फलंकरम्॥
षट्द्रव्य रससंयुक्तं शिवस्याचमनीयकम्।

अर्घ्य

तिल व्रीहि कुशाग्राणि आपः क्षीरं यवास्तथा॥
तंडुलैस्सर्षपोपेतमर्घ्यमष्टांगमुच्यते।

शुखशुद्धिः॥

निःश्वासे-

शंखं च क्षालयेद्धीमान् तुषदग्धेन शुध्यति।
शंखमन्तश्शु चिकरं बहिरस्थिवदाचरेत्॥
तस्मात् सर्व प्रयत्नेन कर्तव्यं कनकादिना।

(६) ईक्षणादि शुद्धिमंत्रम्॥

कामिके-

ईक्षणं मूलमंत्रेण प्रोक्षणं चास्त्रमंत्रतः।
ताडनं चास्त्रमंत्रेण वर्मणाभ्युक्षणं भवेत्॥
जडचित् भेदनं विद्धि शिवदृष्ट्या निरीक्षणम्।
प्रोक्षणं योग्यता कुप्ति जडात् भिन्नस्य वस्तुनः॥
ताडनं तत्र चिद्व्यक्तिः यथा पाषणताडनम्।
उत्पत्तिर्विस्फुलिंगानामभ्युक्षणमतः परम्॥

तत्फलम्॥

पारमेश्वरे-

दृक् क्रियेच्छात्मकैरर्कवह्निसोमविलोचनैः।
क्रमाच्छुष्कं तथा दग्धं अमृतप्लुतिसंयुतं॥
शुध्यर्थं प्रोक्षितं शक्तितैजसं ताडनं ततः।
अभ्युक्षण क्रियाजातं ग्राह्यताभावसंयुतम्॥

तंत्रसारे-

मायेयं रूपसंत्यागादात्तशक्तिस्वरूपतः।
शिवयोगं भवेद्द्रव्यं स क्रियाद्द्रव्यशोधनम्॥
द्रव्यशुद्धिं विधायैव स्वशिरस्यर्घ्यसेचनम्।
कृत्वास्त्रेणाथ मूलेन पुष्पमारोप्य मूर्ध्नि च॥
ललाटे तिलकं कृत्वा चन्दनेन सुगन्धिना।
आसनं मूर्तिमूलेन आत्मपूजां च कारयेत्॥
मंत्रशुद्धिं ततः कुर्यात् तत् शुद्धिरथ कथ्यते।

(४)

मंत्रशुद्धिः॥

शिवधर्मे-

प्राकृतं भावमुत्सृज्य शिवोऽहमिति भावयेत्॥
यावन्न तत्समो जातः तावन्नाराधने क्षमः।
शुद्धत्वाच्च शिवत्वाच्च देहं शिवतनुं स्मरेत्॥

चिन्त्यविश्वे-

मौनी भूत्वा शिवं ध्यात्वा मूलमंत्रादिकानणून्।
ओंकारं पूर्वमुच्चार्य नमस्कारान्तमेव च॥

ब्रह्मांगानि च प्रासादं शिवबीजं तथैव च।
ह्रस्वं बिन्दुगतं दीर्घं ब्रह्मरंध्रावधि प्लुतम्॥
द्वादशांतरसंयुक्तं प्रासादं मंत्रशुद्धये।
ज्ञानशक्तिमया मंत्राः किन्त्वैश्वर्यमलान्विताः॥
शक्तिज्वलित सामर्थ्यास्सर्वऽभीष्टलप्रदायकाः।
मंत्रशुद्धिरियं प्रोक्ता पूजाकाले तु संस्मरेत्॥

(५)

लिंगशुद्धः॥

अंशुमति-

लिंगं संगृह्य हस्ताभ्यां स्नानवेद्युपरि न्यसेत्।

कामिके-

लिंगमूर्ध्निगतां पूजां पूर्वकालप्रकल्पिताम्॥
गायत्र्या पूजयित्वा तु सानान्यार्घ्यं तु दापयेत्।

सूक्ष्मे-

अर्घ्योदकेन संप्रोक्ष्य वक्त्रन्यासं समाचरेत्।
अङ्गुष्ठादि कनिष्ठान्तं पञ्चब्रह्मतनुं न्यसेत्।
ईशानादि तु सद्योऽन्तं वक्त्रन्यासक्रमं तथा॥
कनिष्ठानामिका मध्ये नवपुष्पं तु संयमेत्।
अङ्गुष्ठतर्जनीभ्यां च निर्माल्यं च विसर्जयेत्॥
विसर्जनस्य तत्काले पुष्पं मुर्ध्नि च विन्यसेत्।

किरणे-

न शून्यमस्तकं लिङ्ग कुर्यात्तत्र कदाचन॥
ऐशान्यां स्थापयेत्पूजां प्रत्यग्रमथवोषिताम्।

कामिके-

अस्त्राम्बुनैव संशोध्य शिवलिंग सवेदिकम्॥
सामान्यार्घ्यजलैः पश्चाद् अभिषेकं समाचरेत्।

ज्ञानरत्नावल्यां-

नित्यपूजासमाप्ते तु रुद्धे मन्त्रगणेश्वरे॥
शान्तारूपं गते तत्र लिङ्गपीठे च तत्क्षणात्।
रौद्रा विघ्नास्तथा सक्ताः स्थिताः विघ्नं प्रकुर्वते॥
भुक्तिं मुक्तिं च निध्नन्ति तस्मात्तां त्रासयेत्पुरा।
शिवास्रेण च लिंगस्थां पीठे पाशुपतेन च॥
पुनस्तां तां च संस्नाप्य स्नापयेद्हृदयाम्बुभिः।
तदा लिङ्ग भवेत् शुद्धं पुनर्मन्त्राः फलप्रदाः॥

अजिते-

कूर्चेन बहुना लिङ्ग शोधयित्वाथ पीठकम्।
अस्त्रेण क्षालयेत् सम्यक् बहुशोऽशून्यमस्तकम्॥
पञ्चगव्यं ततस्स्नाप्य पञ्चामृतमतः परम्।
स्नापयेन्मन्त्रपूतेन विपंगादि (?) ततः परम्॥

IV

आत्मशुद्धि ततः कुर्याद् द्विविधा सा प्रकीर्तिता।
आत्मनश्च शरीरस्याप्यात्मसंज्ञात्र कथ्यते॥
तयोस्तु शुद्धिरित्यात्मशुद्धिरेवं प्रकीर्तिता।
पवित्रपाणिः संसाध्यसामान्यार्घ्यं तु पूजकः॥
पुष्पाक्षतसमोपेतं सामान्यार्घ्यमिति स्मृतम्।
अभ्युक्ष्य तेन तोयेन स्वशिरोऽस्त्रं समुच्चरन्॥
विध्युक्तं च ततः कुर्यात्त्रिपुण्ड्रं सितभस्मना।

प्राणायामत्रयं पश्चाद्रेचकादिक्रमेण तु॥
कृत्वान्तःसुषिरं ध्यायेदापादतलमरतकम्।
सुषुम्नामध्यगां तस्य बहिरन्तश्च संस्थिताम्॥
स्मरेद्व्योमात्मिकां शक्तिं पुनः सुषिरमध्यमे।
विद्युज्ज्वलन्तं हुंकारं संचिन्त्यायम्य चानिलम्॥
तदूर्ध्वस्थे च हुंकारे चित्तमावेश्य मन्त्रवित्।
रेचकान्ते ततस्तेन फडन्तेन विभेदयेत्॥
ग्रन्थीन्हृत्कण्ठयोस्तालु भ्रूमध्यब्रह्मरन्ध्रजान्॥
ततः प्रतिनिवृत्तस्तु चैतन्यं पूरकेण तु॥

According to to Jñānārṇava :

आत्मा स्थानं मन्त्रहव्ये देवशुद्धिस्तु पञ्चमी।
यावन्न कुरुते देवि तस्य देवार्चनं वृथा॥
१) सुस्नातैर्भूतशुद्धैश्च प्राणायामादिभिः प्रिये।
षडङ्गाद्यखिलन्यासैरात्मशुद्धिरितीरिता॥

२) ग्रथिता मातृकावर्णैर्मूलमन्त्राक्षराणि च।
क्रमोत्क्रमाद् द्विरावृत्त्या मन्त्रशुद्धिरितीरिता॥

३) पूजाद्रव्याणि मूलास्त्रैः प्रोक्षणीयैर्विशेषतः॥
दर्शयेद् धेनुमुद्रादि द्रव्यशुद्धिरितीरिता॥

४) पीठे देवं प्रतिष्ठाप्य सकलीकृत्य मन्त्रवित्।
मूलमन्त्रेण दीपादीन् माल्यादिनुदकेन च।
त्रिवारं प्रोक्षयेद्विद्वान् देवशुद्धिरितीरिता॥
पञ्चशुद्धिं विधायेत्थं पश्चाद्यजनमाचरेत्॥
हृदि संहृत्य तत्रस्थं सान्तबीजमयं हृदा।
स्मृत्वा संपुटितं जीवं तनुं पुर्यष्टकान्वितम्॥

हुंकारस्य शिखान्तस्थं सूक्ष्ममात्मानमव्ययम्।
कृत्वा कुम्भकमूर्ध्वे तं रेचकेन प्रवर्तयेत्।
रन्ध्रैस्तैस्तु पुरा प्रोक्तैर्हुंकारोद्धतमन्त्रतः।
ततः शिवे शिखाग्रे तु शुद्धस्फटिकसंनिभे॥
द्वादशाङ्गुलमात्रस्थे ताररूपे निवेशयेत्।
ध्यात्वा देहं स्वकं पश्चाद्दहेद्वै तनुरोमतः॥
अग्निमण्डलमध्यस्थज्वालामालानुसन्ततः।
पादाङ्गुष्टं समारभ्य मस्तकान्तं च मन्त्रवित्॥
दग्धनिःशेषपापत्वाद्विमलीकृतमुज्ज्वलम्।
सितभस्ममयं ध्यात्वा भूतशुद्धिं समारभेत्॥
पञ्चभूतसमारब्धं शरीरं सर्वदेहिनाम्।
तस्मात्तेषु कृता शुद्धिर्भूतशुद्धिरिति स्मृता॥
भूतांशां शरीरेऽस्मिन्मिश्रभावात्स्थितावपि।
व्यवच्छेदस्थितिं तेषां शुद्ध्यर्थं परिकल्पयेत्॥
शुद्धिर्मन्त्रात्मिका यस्मात्तस्मान्मन्त्रण शोधयेत्।
पृथ्व्यादिभिस्ततो बीजैः पञ्चभिश्च जनार्दन॥
हृदयं च शिरश्चैव शिखा कवचमेव च।
अस्त्रं च क्रमशस्त्वेतान्संयोज्य सुसमाहितः॥
हुंफडन्तं ततस्तेषु पृथक्सर्वेषु योजयेत्।
शोधयेत्पञ्चभूतानि स्मृत्वा तन्मण्डलादिकम्॥
चतुरश्रं हरिद्राभं कठिनं वज्रलञ्छितम्।
निवृत्त्याख्यकलारूपं परमेष्ठ्यधिदैवतम्॥
आजानु संस्थितं तच्च मन्त्रोद्घातैश्च पञ्चभिः।
विशोध्य पार्थिवांशं तमप्यशुद्धिरतः परम्।
चापाकारं सितं सौम्यं पद्मलाञ्छनलाञ्छितम्।
प्रतिष्ठाशक्तिरूपं तं विष्ण्वीशं तोयमण्डलम्।
आनाभि संस्थितं तच्च चतुरुद्घाततः शुचिः।

आग्नेयमण्डलं रक्तं त्र्यश्रं स्वस्तिकलाञ्छितम्॥
क्रूरं विद्याकलारूपं रौद्रमाकण्ठसंस्थितम्।
उद्घातैः शोधनं तस्य त्रिभिरेव प्रकीर्तितम्॥
वायव्यं तु षडश्रं स्यात्कृष्णं षड्बिन्दुलाञ्छितम्।
चलं शान्ति कलारूपमैश्वरं च ललाटके॥
उद्घातद्वितयेनाथ वृत्तं पाण्डरं शूललञ्छितम्।
आकाशमण्डल वृत्तं पाण्डरं शूललञ्छितम्॥
निर्मलं शान्त्यतीताख्यं सदाशिवाधिदैवतम्।
ललाटाद् द्वादशाङ्गुल्यामेकोद्घातस्ततः शुचिः॥
विशुद्धभूतजातेऽस्मिन् देहे धातूश्चं शोधयेत्।
त्वचोऽसृङ्मांसयोश्चैव मेदसोऽस्थिस्ततः परम्॥
मज्ज्याः शुक्लकस्यापि शुद्धिं भूरादिसप्तभिः।
मन्त्रैः कुर्याच्छिरोवक्त्र कण्ठहृद्गुह्यजानुषु॥
पादयोः संस्थितान्मत्वा क्रमेणैव जनार्दन।
एवं शुद्धं शरीरं तत् स्रवता परमामृतात्॥
ताररूपाच्छिवादस्मादमृतेनाथ पूरयेत्।
ब्रह्मरन्ध्रप्रविष्टेन चन्द्रबीजं समुच्चरन्॥
ततश्च संस्मरेद्देहं विमलं भास्वरं तथा।
अकलङ्को यथा पूर्णश्चन्द्रो नभसि निर्मले॥
ईदृशीमनयोः शुद्धिं कृत्वा देहात्मनोरपि।
शिवीभूते शरीरेऽस्मिञ्शिवीभूतस्य देहिनः॥
आसनं हृदि निष्पाद्य साष्टपत्रं सकर्णिकम्।
पद्मं तत्रस्थमात्मानमनामयमनाकुलम्॥
बीजरूपं समानीय प्रस्फुरद्रश्मिमण्डलम्।
व्योमस्थाद् द्वादशान्ताच्च शिवरूपं निवेशयेत्।
अमृतेनाभिषिच्यैनं ताररूपं ततः शिवम्।
वौषडन्तेन मूलेन कराभ्यां व्योमसंस्थितम्॥

आनीयामृतरूपं तमात्मतत्त्वोपरि न्यसेत्।
करन्यासं ततः कुर्यात्तद्विधिश्चोच्यते मया॥
तलके हस्तपृष्ठे च गन्धचन्दनलेपिते।
परस्परावमघर्षेण सुधूपेन सुधूपिते॥
शोधयित्वास्त्रमन्त्रेण मूलेनैव च देशिकः।
हस्तयोः करशाखासु पूर्वस्वङ्गुष्ठयोरपि॥
विन्यसेत्पञ्चमं पश्चात्पुरुषादिचतुष्टयम्॥
तर्जन्याद्यासु विन्यस्य कनिष्ठान्तासु च क्रमात्॥
ततः कनिष्ठिकाद्यासु पञ्चस्वङ्गलिषु क्रमात्।
हृदादिपञ्चकं न्यस्य तलयोर्नेत्रमेव च॥
स्थितिन्यासस्त्वयं प्रोक्तोविपरीता तु संहृतिः।
दक्षिणेतरयोः पश्चात्सूर्यसोमौ च हस्तयोः॥
तत्तन्मन्त्रेण विन्यस्य मध्यमाभ्यां परस्परम्।
कवचेनावकुण्ठ्याथ करकच्छपिकां ततः॥
मुद्रां कराभ्यामाबध्य करन्यासं समाप्य च।
अङ्गन्यासं ततः कुर्यान्मन्त्रैरेतैर्जनार्दन॥
मूर्ध्नि वक्त्रे च हृद्देशे गुह्यदेशेऽथ पादयोः।
ईशानादिक्रमेणैव विन्यसेत्पिण्डपञ्चकम्॥
अङ्गुष्ठाग्रेण मूर्ध्नीशं विन्यसेद्बद्ध मुष्टिना।
मुखे तत्पुरुषं चैव तर्जन्यङ्गुष्ठयोगतः॥
मध्यमाङ्गुष्ठयोगेन हृद्यघोरं ततो न्यसेत्।
अङ्गुष्ठानामिकोयोगाद् गुह्ये वामं च विन्यसेत्॥
कनिष्ठाङ्गुष्ठयोगेन सद्योजातं तु पादयोः।
पिण्डमन्त्रैरयं प्रोक्तः कलामन्त्रैस्तथोच्यते॥
कलाः पञ्च चतस्रश्च ततोष्टौ च त्र्योदश।
ततश्चाष्टौ समादिष्टाः कलाश्चेशादितः क्रमात्॥
शक्तयश्च तथैव स्युः स्थानानि च तथैव हि।

शशिनी चाङ्गदा निष्ठा मरीचि ज्वालिनी तथा॥
मूर्ध्नि मध्ये ततः पूर्वे दक्षिणोत्तरयोरपि।
पश्चिमे च क्रमेणैव कलाभिः सह विन्यसेत्॥
ईशानस्य कलाः पञ्च विन्यस्यैवमतः परम्।
शान्तिर्विद्या प्रतिष्ठा च निवृत्तिश्च क्रमेण वै॥
पूर्वे च दक्षिणे वक्त्रे चोत्तरे पश्चिमेपि च।
एवं तत्पुरुषस्यापि कलाभिः सह विन्यसेत्॥
तत्पुरुषकलान्यासे विमेषोऽत्र विधीयते।
शान्त्यतीतकलायुक्तं प्रणवं चोर्ध्ववक्त्रके॥
विन्यसेच्छिवलिङ्गे तु न शरीरे तदिष्यते।
तमो मोहा क्षुधा निद्रा मृत्युर्मायाभया जरा।
एता घोरकलाशक्तीर्हृदि कण्ठेऽसयोरपि।
नाभौ कुक्षौ च पृष्ठे च वक्षस्यष्टकलायुताः॥
विन्यस्थाय च वामस्य त्रयोदशकला अपि।
शक्तिभिर्विन्यसेत्ताश्च क्रमेण कथयामि ते॥
रजो रक्षा रतिः पाली कामा संयमिनी क्रिया।
बुद्धिः कार्या तथा धात्री भ्रामिणीं मोहिनी तथा॥
एताः क्रमेण गुह्येऽथ मेढ्रे चोर्वोस्तथैव।
जान्वोश्च जङ्घयोश्चापि स्फिचोः कट्यां तथैव च॥
पार्श्वयोश्चि कलाभिस्तु विन्यस्याथा कलाष्टकम्।
सद्योजातस्य मन्त्रस्य शक्तिभिः सह विन्यसेत्॥
सिद्धिऋद्धिर्द्युतिर्लक्ष्मीर्मेधा कान्तिः स्वधा धृतिः।
शक्तयस्तु समुद्दिष्टाः स्थानानि क्रमतः शृणु॥
पादौ पाणी च नासा च शिरो बाहू तथैव च।
अष्टत्रिंशत्कला ह्येवं विन्यसेत्स्वस्वशक्तिभिः॥
निजया मुद्रया पश्चादङ्गन्यङ्गेषु विन्यसेत्।

हृदयं हृदि विन्यस्य शिरः शिरसि विन्यसेत्॥
शिखायां तु शिखां न्यस्य कवचं च तथोरसि।
नेत्रं नेत्रद्वयोश्चापि विन्यसेदक्षराणि च॥
अकारं मूर्ध्नि विन्यस्य चाकारं तु ललाटके।
भ्रुवोरिकारमीकारं दक्षिणेतरयोः क्रमात्॥
तथैवोकारमूकारं नेत्रयोरथ विन्यसेत्।
ऋकारं तस्य दीर्घं च नासिकापुटयोर्न्सेत्।
लृकारद्वितयं तद्वद् दन्तपङ्क्त्योश्च विन्यसेत्।
उत्तरोष्ठे तथैकारमैकारमधरोष्ठके॥
ओकारं चाप्यथौकारं कर्णयोः स्यात्ततः परम्।
अंकाराःकारकौ चापि गण्डयोरथ विन्यसेत्॥
कवर्गं दक्षणे हस्ते चवर्गं च तथोत्तरे।
टवर्गमुदरे न्यस्य तपवर्गौ च पार्श्वयोः॥
ळवर्णं हृदये न्यस्य मूलमन्त्रं च विन्यसेत्॥
इति मन्त्राक्षरन्यासौः कृत्वा विद्यामयीं तनुम्।
परमीकरणं कृत्वा महामुद्रापयोगतः॥
प्ररोच्य तेजसा देहमात्मशुद्धिं समापयेत्।
ततः स्थानविशुद्ध्यर्थं नाराचास्त्रप्रयोगतः॥
'स्थानशुद्धिक्रमं श्रृणु।
हस्तमात्रं खनेद्भूमिं तां मृद्भिः पूरयेत्क्रमात्॥
सम्यक् परीक्ष्य बहुधा अस्थिलोष्ठादि वर्जयेत्।
समं भूमितलं कृत्वा प्रोक्षयेत्पञ्चगव्यतः॥
वितानध्वजसंयुक्तं कदलीक्रमुकान्वितम्।
दर्भमालासमायुक्तं मुक्तादामविभूषितम्॥
पुष्पमालासमाकीर्णं प्रोक्षयेत्कुशवारिणा।
स्थानशुद्धिक्रमः प्रोक्तः
दिग्बन्धं पूर्वमापाद्य ततस्तालत्रयेण च।

परितस्तालमस्त्रेण कवचेनावकुण्ठनम्॥
कुर्याद्याग गृहस्यैवं स्थानशुद्धिरुदाहृता।
अन्तर्यागं ततः कुर्याद्धृदये च विधानतः॥
नाभौ होमविधानेन ललाटे ध्यानयोगतः।
द्रव्यशुद्धिं ततः कुर्यादथ तच्छुद्धिरिष्यते॥
प्रक्षालितेषु पात्रेषु सर्वेष्वस्त्रप्रयोगतः।
पाद्यस्याचमनीयस्य तथार्घ्यस्य च मन्त्रवित्॥
पात्राणि वस्त्रपूतेन पूरयेद्ग न्धवारिणा।
मन्त्रसंहितया तेषु तत्तद्द्रव्याणि निक्षिपेत्॥
प्रणवेनाभिमन्त्र्यैतन्मुद्रयेद्धेनुमुद्रया।
अवकुण्ठनमेतेषां कवचेनाथ कल्पयेत्॥
गन्धपुष्पादिकं यत्तद् द्रव्यं संप्रोक्ष्य चास्त्रतः।
अभ्युक्ष्य कवचेनाथ मन्त्रसंहितयालभेत्॥
द्रव्यशुद्धिर्विधातव्यास्वशिरस्यर्घ्यसेचनम्।
कृत्वास्त्रेणाथ मूलेन पुष्पमारोप्य मूर्धनि॥
ललाटे तिलकं कृत्वा चन्दनेन सुगन्धिना।
मन्त्रशुद्धिं ततः कुर्यात्तच्छुद्धिरिह कथ्यते॥
मौनी भूत्वा शिवं ध्यातवा मूलमन्त्रादिकानणून्।
ओंकारदीपितन्सर्वान् नादान्तान् सम्यगुच्चरेत्॥
नाराचास्त्रप्रयोगेण प्रासादान्तः प्रविश्य च।
पुष्पं प्रक्षिप्य चास्त्रेण पार्ष्णिघातत्रयं ततः॥
कृत्वा दक्षिणापादेन तेनैवान्तःप्रवेशनम्।
वामशाखाश्रयी भूत्वा देहलीमस्पृशंस्तदा॥
देहल्यां विघ्नाशार्थं पुष्पमस्त्रेण निक्षिपेत्।
महाघण्टां ततोऽभ्यर्च्य हेतिना तेन ताडयेत्॥
कृत्वा यवनिकां पश्चाद्देवाभ्याशप्रवेशने।
ईक्षणेन ततो दिव्यान् पुष्पक्षेपेण नाभसान्॥

भूमिष्ठान् पार्ष्णिघातेन विघ्नानुत्सारयेत्ततः।
ततो लिङ्गन्तिकं गत्वा दत्त्वार्घ्यं लिङ्गमस्तके॥
सामान्यार्घ्येण तां पूजां पूर्वसंध्यार्चितां ततः।
गायत्र्याभ्यर्च्य निर्माल्य पञ्चब्रह्म जपेद्बुधः॥
कनिष्ठानामिकाभ्यां तु व्यपोह्य शिरसि न्यसेत्।
तर्जनीमध्यमाभ्यां तु गृहीतं कुसुमं तु यत्॥
अपनीय तु निर्माल्यं पिण्डिकेशानदेशके।
चण्डेशायेति निक्षिप्य बाह्ये चण्डाय दापयेत्॥
अन्यदाभरणं प्रातर्मुक्त्वा द्रव्येण शोध्य च।
प्रक्षाल्यास्त्रेण निक्षिप्य लिङ्गशुद्धिं समाचरेत्॥
आवर्तितजलद्रोण्यां चन्दनादिसुवसितम्।
मन्त्रसंहितया वाथ पवित्रैरभिमन्त्रितम्॥
सुवर्णाद्यैर्यथालाभं कृतेन कलशेन तु।
स्वशिरःपरिणाहेन शिवार्धपूरकेण वा॥
निश्छिद्रेणातिशुद्धेन शोधितेनास्त्रमन्त्रतः।
गृहीत्वाथ जलं तेन लिङ्गशुद्धिं समाचरेत्।
कुशोशीरादिमूलेन कृतेन सुदृढेन तु।
कूर्चेन बहुशो लिङ्ग शोधत्विा सपीठकम्॥
अस्त्रेण क्षालयेत्सम्यग्बहुशोऽशून्यमस्तकम्।
यथा तथाभिषिच्याथ स्थलशुद्धि च कारयेत्॥
आत्मानं च स्थलं द्रव्यं मन्त्रं लिङ्गं च पञ्चकम्।
विशोध्यैवं ततो मन्त्री यजेल्लिङ्गे सदाशिवम्॥

Paushkrāgama, Kriyā pāda

नदीषु देवखातेषु पल्वल प्लवनेषु च।
दीक्षितस्योत्तमं स्नानं पुष्कारिण्यां तु मध्यमम्॥
कूपेऽधमं स्नानमाहुर्गृहे श्रेष्ठं प्रकल्पितम्।

नवाष्टपञ्चभिः कुम्भैः शिवमन्त्रप्रकल्पितैः।
स्नानं गृहेऽपि कर्तव्यं लिप्तायाण भुवि दीक्षितैः॥

Kālottara-tantra, 2nd paṭala

अन्तः करणविन्यासो भूतशुद्धिस्तथैव च।
भूतशुद्धिं पुरा कृत्वा ततोऽन्तः करणं कुरु॥१॥
रामकण्ठीये- भूतानां बाह्यशरीराम्भकाणां।
शुद्धिः न पुनः क्षयः।
प्रागारब्ध कार्यकर्म भोगो रोधेन तस्य दीक्षाया
मकृतत्वात्।

Chapter Four

ARTICLES IN WORSHIP

Worship is an elaborate ritual consisting of numerous sequences, each of which requires the use of various articles. The āgama texts not only mention the articles that are thus required for formal worship, but also provide details about the precise nature and number of these articles, and the exact manner in which the articles are to be employed. There are also restrictions about the quality of the articles that are offered. Besides the classification into sattva, rajas, and tamas, there are other considerations like colour, smell, place of origin and so on, which determine whether a particular article is acceptable or not.

Water that is used in worship, for instance, is required to be freshly collected in the early hours of the day; water left over during night is not to be used. And water must be collected preferably from a river or from a well or tank located within the temple-premises (deva-khāta). The chief priest along with attendants must set out in a procession with music to bring water from a natural source. He must take with him five or nine clean vessels (of gold, silver or copper) and placing them on the " ground near the water source, recite 'rudra-sūkta', bow down to the water and then fill the vessels. Regarding the time suitable for collecting water, here are some prescriptions:

अर्धरात्रात्परे काले जलसंग्रहणं मतम्॥

(Kāraṇāgama)

जलसंग्रहणं चैव पुष्पसंग्रहणं तथा।
उदये चैव कर्तव्यं रात्र्यन्ते वा जलं हरेत्॥

(Kāmikāgama)

देवतास्थापनं तीर्थं प्रातःकाले समाहरेत्।
प्रातः कालात्समारभ्य यावत्कौशिकनाडिकाः।
तावद्वापि च कर्तव्यं तीर्थसंग्रहणं वरम्॥

(ibid)

About the preferred souce of water and the manner of collecting water, we have the followin:

उत्तमं तु नदीतोयं तटाकान्मध्यमं भवेत्।
अधमं कूपतोयं स्याज्जलभेदः प्रकीर्तितः॥

(Kāmikāgama)

ततो गुरुर्नदीतीरमथवा देवखातकम्।
गत्वा द्विजवरैर्युक्तः पञ्चवाद्यसमन्वितः॥
प्रणिपत्य महादेवं रुद्रसूक्तमनूच्चरन्।
तथा वित्तानुसारेण पात्राणि नव पञ्च वा॥
स्वर्णदुर्वर्णताम्रैर्वा विद्याद् द्रोणत्रयं कृतम्।
अग्रोदकार्थं कुम्भश्च ह्युत्तमं मध्यमाधमम्॥
शिरसा धारयित्वा वा चाहरेत् वाद्यसंयुतः।
पुष्पमाल्यैरलंकृत्य भद्रं कर्णेति मन्त्रतः॥
छत्र चामरसंयुक्तो देवघोषसमन्वितः।
नानावाद्यसमायुक्तः प्रविशेदालयं ततः॥
धामप्रदक्षिणं कृत्वा देवस्याग्रे विनिक्षिपेत्॥

(op.cit)

Water (known as agrodaka) thus collected in a pot made of gold, silver or copper to contain three 'dronas' of water (a droṇa is the measure of capacity equal to sixty-four shers or four āḍhakas, see later) is brought to the shrine on the back of an elephant (if the temple owns one) or on the head of the priest. The pots containing water are decorated with flowers. The return procession is accompanied with music on instruments and recitation of Vedic hymns and also with white umbrella and flywhisks. Before bringing the water-vessels into the sanctum, the procession circumambulates the shrine.

When water is thus brought in, the several vessels, cleaned and kept ready in the sanctum or in the adjoining chamber, are filled with this water along with other prescribed articles. The vessels are distinguished according to the sequence of worship in which water is used. It is usual to have vessels of water assigned for arghya (water-offerings for respectful reception), pādya (water- offerings for washing feet), ācamanīya (water for ceremonial sipping for purification) and snāna (water for ritual bath). Some texts prescribe three vessels for 'pādya', three for 'arghya, eight for ācamanīya; and one for 'madhuparka'.

अर्घ्यमादौ तथा स्नाने पूजान्ते च प्रदीयते।
आदौ स्नाने विभूषान्ते पाद्यं कालेषु वै त्रिषु॥
पाद्यान्ते मधुपर्कान्ते स्नानाद्यन्ताम्बरादिषु।
निवेद्यान्ते च षट्स्वेषु दद्यादाचमनीयकम्॥

(Pauṣkara-saṁhitā)

